# Gopalayogikrita Shri Hari Stuti

# ગોપાલયોગિકૃતા શ્રીહરિસ્તુતિઃ

## Document Information

Text title : Gopalayogikrita Shri Hari Stuti

File name : gopAlayogikRRitAshrIharistutiH.itx

Category : vishhnu, svAminArAyaNa, krishna, stuti, aShTaka

Location : doc_vishhnu

Author : gopAlayogi

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# Gopalayogikrita Shri Hari Stuti

# ગોપાલયોગિકૃતા શ્રીહરિસ્તુતિઃ

મહાતેજઃપુઞ્જસ્ફુરદમલસિંહાસનવરે
સ્થિતં સર્વાધીશં વિમલતરતેજોમયતનુમ્ ।
ભૃશં ધન્યોઽહં ત્વાં દૃશિ સમધિગમ્યાક્ષર
શરણ્ય ત્વં શશ્વદ્ નયનપથગો મે ભવ વિભો ॥ ૧॥

યતઃ સર્વં જાતં વિયદનિલમુખ્યં જગદિદં
સ્થિતૌ નિઃશેષં યોઽવતિ નિજસુખાંશેન બહુધા ।
યે સર્વં સ્વસ્મિન્ હરતિ કલયા યસ્તુ સ પ્રભુઃ
શરણ્ય ત્વં શશ્વદ્ નયનપથગો મે ભવ વિભો ॥ ૨॥

અસૂનામ્યાદૌ યમનિયમમુખ્યૈઃ સુકરણૈ-
નિરુધ્યેદં ચિત્તં હૃદિ વિલયમાનીય સકલમ્ ।
યમીડ્યં પશ્યન્તિ પ્રવરમતયોઽસૌ સ્વહૃદયે
શરણ્ય ત્વં શશ્વદ્ નયનપથગો મે ભવ વિભો ॥ ૩॥

પૃથિવ્યાં તિષ્ઠન્ યો યમયતિ મહીં વેદ ન ધરા
યમિત્યાદૌ વેદો વદતિ જગતામીશમમલમ્ ।
નિયન્તારં ધ્યેયં મુનિસુરનૃણાં મોક્ષદમૌ
શરણ્ય ત્વં શશ્વદ્ નયનપથગો મે ભવ વિભો ॥ ૪॥

જયન્તીન્દ્રાદ્યાસ્તે દિતિજનિચયાન્ યસ્ય બલતઃ
સ્વતન્ત્રો નો કશ્ચિત્ ક્વચિદપિ કૃતૌ યત્કૃતિમૃતે ।
કવિત્વાદેર્વં પરિહરતિ યોઽસૌ વિજયિનઃ
શરણ્ય ત્વં શશ્વદ્ નયનપથગો મે ભવ વિભો ॥ ૫॥

વિના યસ્ય ધ્યાનં વ્રજતિ પશુતાં સૂકરમુખાં
વિના યસ્ય જ્ઞાનં જનિમૃતિભયં યાતિ જનતા ।
વિના યસ્ય સ્મૃત્યા કૃમિશતજનિં યાતિ સ હરિઃ
શરણ્ય ત્વં શશ્વદ્ નયનપથગો મે ભવ વિભો ॥ ૬॥

યદા ધર્મગ્લાનિર્ભવતિ જગતીક્ષોભકરણી
તદા સર્વસ્વામિન્ પ્રકટિતવપુઃ સેતુધૃગજઃ ।
સતાં ધાતા ચૈવં નિગમપ્રમુખાગીતગુણકઃ
શરણ્ય ત્વં શશ્વદ્ નયનપથગો મે ભવ વિભો ॥ ૭॥

સ્વયં પ્રાદુર્ભૂતઃ પરમકૃપયાદ્યાત્ર વૃષજો
ઘનશ્યામો વર્ણી મુનિજનસખો બન્ધુરપિ મે ।
સદા સ્મરાસ્યાબ્જઃ શરણશરણો ભ્રાન્તિહરણઃ
શરણ્ય ત્વં શશ્વદ્ નયનપથગો મે ભવ વિભો ॥ ૮॥

ઇતિ શ્રીસ્વામિનારાયણબાપાચરિત્રામૃતસાગરે દ્વિતીયપ્રવાહે
સપ્તમે તરઙ્ગે ગોપાલયોગિકૃતા શ્રીહરિસ્તુતિઃ સમ્પૂર્ણા ।

*Gopalayogikrita Shri Hari Stuti*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*